**International Research Journal of Human Resources and Social Sciences**
ISSN(O): (2349-4085) ISSN(P): (2394-4218)
**Impact Factor**- 5.414, Volume 4, Issue 8, August 2017
**Website**- www.aarf.asia, **Email** : editoraarf@gmail.com

# पाश्चात्यैः प्रतिपादितानि विभिन्नानि शैक्षिकोद्देश्यानि

## डॉ धनंजय मिश्रः

सहायक-आचार्यः (साहित्य-विभागः)

राष्ट्रीय संस्कृत संस्थानं (मानित विश्वविद्यालयः) श्री सदाशिव परिसरः, पुरी (ओडिशा)

शिक्षायाः अर्थः- शिक्षा आङ्ग्लभाषायां **Education** इत्युच्यते । **Education** शब्दस्योत्पत्तिः "लैटिनभाषायाः निम्नलिखितशब्दः समभवत् । यथा-

१. एडुकेटम **(Educatum)** = शिक्षणम्

२. एड्सीयर **(Educere)** = विकासनम् निष्कासनं वा

३. एडुकेयर **(Educare)** = अग्रेसरणं, बहिर्निष्कासनं विकासनं वा

अनेन स्पष्टं भवति यत् प्रत्येकस्मिन् बालके जन्मनैव काश्चन जन्मजातप्रवृत्तयः भवन्ति । यथा बालकः वातावरणेन सह सम्बन्धं स्थापयति तथा तस्य जन्मजातशक्तयः विकसन्ति । अतः शिक्षायाः अर्थः बालकस्य जन्मजातशक्तीनामन्तःबहिर्प्रति विकासमस्ति । निष्कर्षरूपेण शिक्षायाः अर्थः बालकस्य जन्मजातशक्तीनां सर्वांगीणः विकासः ।

शिक्षायाः सामग्रयः - "शिक्षा-सामग्री" इत्यन्तर्गतं चत्वारि घटकानि समायान्ति ।

१. बालकः २. वंशानुक्रमः, ३. वातावरणम् ४. समयः

१. बालकः - अतः शिक्षायाः सर्वोत्तमा सर्वमहत्त्वपूर्णा च सामग्री बालकोऽस्ति । बालकस्य पूर्णविकासाय तस्य प्रकृतेः ज्ञानं परमावश्यकमस्ति । तस्य शारीरिक- मानसिक-सामाजिक-संवेगात्मश्च विकासः । एतासां जन्मजातशक्तीनां ज्ञानाभावे न भवितुं शक्नोति।

**© Associated Asia Research Foundation (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

२. वंशानुक्रमः - शिक्षायाः प्रारम्भात् पूर्वमेव वंशानुक्रमसंस्काराः बालकोपरि स्वप्रभावान् स्थापयन्ति । यथा च प्रभावोऽयं चिरस्थायी भवति | एतस्मादेव कारणात् बालकस्य शिक्षा तावदेव भवितुं शक्नोति यावद् तस्य पैतृकसंस्काराः जन्मशक्तयः वा भवन्ति । अतः शिक्षा एका वंशानुक्रमसम्बन्धिनी प्रक्रियास्ति, यदनुसारेण बालकस्य शिक्षा वंशानुक्रमेण पूर्वनिश्चिता भवति ।

३. वातावरणम् - प्रत्येकस्य बालकस्य जन्म निश्चते स्थाने, समये, वातावरणे च भवति । वातावरणं द्विविधं भवति १. नियंत्रितं वातावरणं २. अनियन्त्रितवातावरणञ्च । बालकस्य वंशानुक्रमः कियन्तोऽपि उच्चः स्यात् किन्तु यदि तस्मै स्वशक्तीनां विकासायोचितं वातावरणं न मिलति चेत्, स कस्यामति दशायां उच्च व्यक्तिः भवितुं न शक्नोति । वातावरणम् एका महदशक्तिरस्ति ।

४. समयः - बालविकासे विशिष्टक्रियाणं समयः निश्चितो भवति | अतः बालविकासावबोधनाय विकासस्य शैशव बाल्य-किशोर-प्रोढाश्चावस्थाः तासां विशेषतानाञ्च ज्ञानमावश्यकमस्ति । यदि बालकस्यावस्थानुगुणा शिक्षा ददयात् तदा सः तां शिक्षां सरलतया सफलतया चावगन्तुं पारयति ।

शिक्षायाः संकुचितार्थ :- संकुचितरूपेण शिक्षाया अर्थः सा विद्यालयीया शिक्षा अस्ति, यत्रकः निश्चितः पाठ्यक्रमः समयः इत्यादिबन्धनाधारितं सर्वं भवति ।

जे.एस्.मिल्- "शिक्षया एकवर्गीयाः जना अन्यवर्गीयजनेषु संस्कृतेः संक्रमणं कुर्वन्ति ते तासां संस्कृतीनां संरक्षणं कुर्युः यथासम्भवञ्च तासु वृद्विमपि कुर्युः ।

एस्.एस्. मैकेन्जी- "संकुचितार्थं शिक्षाया अर्थ अस्मदशक्तीनां विकासाय परिमार्जनाय च चेतनापूर्वककृताः प्रयासाः भवितुमर्हन्ति।"

प्रो. ड्रीवर् - शिक्षा एका प्रक्रियास्ति, यस्यां यथा च बालकस्य ज्ञानं व्यवहारं चरित्रच एकास्यां विशिष्टसंरचनायां संरच्यते।"

जी. एच्. थॉमसन्- शिक्षा एक विशिष्टं वातावरणमस्ति यस्य वातावरणस्य प्रभावः बालकस्य चिन्तने, दृष्टिकोणे व्यवहारसम्पादनप्रकृतौ स्थायी परिवर्तनाय उत्पाद्यते "

शिक्षायाः व्यापकार्थः- व्यापकार्थे शिक्षा बालकस्य सर्वानुभवोस्ति यस्य प्रभावः तस्योपरि जन्मना मृत्युं यावत् भवति। शिक्षा एका आजीवनं प्रचलन्ती प्रक्रियास्ति । एतादृशी शिक्षा व्यक्ति समय स्थानविशेषा न भवति, अपितु सम्पर्कानुभवः यद् शिक्ष सा शिक्षा । यः शिक्षयति सः शिक्षकः यत्र शिक्षते तदेव विद्यालयमस्ति । यथा-

एस्.एस्. मैकेन्जी :- "व्यापकार्थे शिक्षा एतादृशी प्रक्रिया, या आजीवनं प्रचलन्ती अस्ति तथा चानया जीवनस्य प्रत्येकानुभवेषु वृद्धिर्भवति ।

एम्. के. गान्धिः - "शिक्षाया अर्थः, अहं बालकस्य मानवस्य वा आत्मनः शरीरस्य बुद्धेश्च सर्वांगीण-विकासः इत्यवबुद्धे।"

डम्बिल- "शिक्षायाः व्यापकार्थे ते सर्वेऽपि प्रभावाः समागच्छन्ति ये व्यक्तिं जन्मना मृत्युं यावत् प्रभावयन्ति ।

शिक्षायाः विश्लेषणात्मकार्थ:-

१. शिक्षा, केवलं विद्यालयीया शिक्षा नास्ति । अपितु आजीवनं प्रचलन्ती प्रक्रियाऽस्ति । बालकः आजीवनं आजगति च शिक्षते।

२. बालकस्य जन्मजात-शक्तीनां विकास: अनया एव शिक्षया भवति ।

एडिसनः- "शिक्षया मानवान्तनिहितानां शक्तीनां गुणानाञ्च दिग्दर्शनं भवति, तथा शिक्षायाः सहायतां विना येषां अन्तर्बहिर्निष्क्रमणमसम्भवमस्ति।"

३. शिक्षा एका गतिशीला प्रक्रियास्ति या बालकं सदैव देश-काल- परिस्थितीनामनुसारं प्रगतिपथमप्रसारयति ।

४. शिक्षा एका द्विमुखी प्रक्रियास्ति यस्यामेकं व्यक्तित्वमन्यं व्यक्तित्वं प्रभावयति, येन तद्व्यवहारे परिवर्तनं जायते। एडम्स महोदयानुसारेण एतस्याः प्रक्रियायाः दो बिन्दु भवतः, शिक्षकः बालकश्च ।

५. शिक्षा एका त्रिमुखी प्रक्रियाऽस्ति । जानडीवीमहोदयानुसरमस्य त्रयः बिन्दवः भवन्ति-शिक्षकः बालकं पाठ्यक्रमच ।

शिक्षायाः परिभाषाः

१. जन्मजातशक्तीनां व्यक्तीकरणप्रक्रियायां शिक्षा-

सुकरातः- शिक्षाया अर्थः प्रत्येकस्मिन् मानवमस्तिष्के अदृश्यरूपेण विद्यमानानां संसारस्य सर्वमान्यविचाराणां प्रकाशनमस्ति ।

फ्राबेल- "शिक्षा सा प्रक्रिया यया बालकस्य जन्मजात शक्तय: बहिप्रकटिता: भवन्ति ।"

विवेकानन्दः- "शिक्षा मानवान्तर्निहित पूर्णतायाः प्रदर्शनमस्ति ।"

२. वैयक्तिकविकास प्रक्रियायां शिक्षा

आर. एन. टैगोर :- शिक्षाया अर्थः मस्तिष्कस्य, तथा निर्माणं, येन सः सत्यान्वेषणे समर्थः तथा तदात्मसात् कृत्वा तस्य सत्यस्य व्यक्तिकरणं स्यात् ।

पेस्टालॉजी- "शिक्षा मानवस्य जन्मजातशक्तीनां स्वाभाविक-समरूपप्रगतिशीलश्च विकासोऽस्ति ।

टी.पी नन् - शिक्षा बालवैयक्तिकतायाः पूर्णविकासोस्ति यया सः स्वपूर्णयोग्यतानुसारं मानवजीवनाय मौलिकं योगदानं दातुं शक्नुयात् ।

काण्ट - "शिक्षा व्यक्तेः तस्याः पूर्णतायाः विकासोऽस्ति, यस्याः पूर्णतायाः तस्मिन् क्षमता भवति ।

३. वातावरणानुकूलनप्रक्रियायां शिक्षा-

बॉसिंग - शिक्षाया कार्यं व्यक्तेः वातावरणेन सह तावद् अनूकूलनकार्यमस्ति येनानुकूलनेन व्यक्तये समाजाय च स्थायी सन्तोषप्राप्तिः स्यात् ।

बटलर- शिक्षा प्रजातेराध्यात्मिकसम्पदा सह व्यक्तेः क्रमिकं सामन्जस्यमस्ति ।

जेम्स- शिक्षा कार्यसम्बन्यजिताभ्यासानां संगठनमस्ति यद् व्यक्तये तदभौतिक- सामाजिकवातावरणे उचितं स्थानं दद्यात् ।

शिक्षायाः रूपाणि

अ. औपचारिकशिक्षा अनौपचारिकशिक्षा च-

औपचारिकी शिक्षा सा, यां बालकः कस्यचिद् कार्यक्रमस्यानुसारं नियन्त्रितवातावरणे स्थित्वा कस्यचिद्, पूर्वनिश्चितोद्देश्यप्राप्तये निश्चितपाठयक्रमं ज्ञानं निश्चितशिक्षणपद्धत्या, निश्चिते समये निश्चिते च स्थाने सामाप्य परीक्षां दत्वा चोपाधिं प्राप्नोति ।

अनौपचारिकी शिक्षा सा शिक्षाऽस्ति या अकस्मात् तथा स्वाभाविकरूपेण भवति । अस्याः सम्बन्धः बालविकासेन भवति। औपचारिकसाधनानि विद्यालयः पुस्तकालयः इत्यादयः सन्ति । अनौपचारिकसाधनानि च परिवारः समाजः क्रीडाङ्गणमित्यादयः भवन्ति ।

ब. प्रत्यक्षा अप्रत्यक्षा च शिक्षा

यदा बालकस्य समक्षं शिक्षकः तेन प्रकारेण नियन्त्रितवातावरणं निर्मापयेत्, यस्मिन् स्थीयमानस्य तस्योपरि व्यक्तित्वं प्रभावितं स्यात् सा शिक्षा प्रत्यक्षा।

अप्रत्यक्षा शिक्षा सा, यस्यां सा कस्यचिद् विशिष्टोद्देश्यस्य प्राप्तये कयाचिद् निश्चितशिक्षणपद्धत्या न दीयते, अपितु स्वतन्त्रे वातावरणे अप्रत्यक्षसाधनैः स्वयमेव सञ्चालिता भवति ।

स. सामान्या, विशिष्टा च शिक्षा-

सामान्या शिक्षा उदारा शिक्षाप्युच्यते। एतस्या शिक्षायाः लक्ष्यं सामान्यं भवति तथेयं प्रत्येकस्यै बालकाय निश्चितस्तरं यावत् सामान्यरूपेण अनिवार्या भवति ।

विशिष्टायाः शिक्षायाः लक्ष्यं विशिष्टं भवति । एतादृशी शिक्षा विशिष्टरूचियोग्यताक्षमतासहितेभ्यः बालकेभ्यः भवति । विशिष्ट-शिक्षाया उद्देश्यं बालकं विशिष्टप्रकाराय जीवनाय व्यवसायाय वा योजनं भवति ।

द. व्यक्तिगतशिक्षा सामूहिकशिक्षा च :-

व्यक्तिगता शिक्षा सा शिक्षास्ति या कमपि बालकम् अन्यस्मात् बालकात् पृथक कृत्वा तस्य रूचियोग्यताक्षमता-आवश्यकतादीनामनुसारं प्रदद्यात् ।

सामूहिक शिक्षा सा शिक्षास्ति यया बहूभ्यः बालेभ्यः एकस्मिन्नेव स्थाने निश्चितविषयाणां ज्ञानं दीयते ।

## शिक्षाया अङ्गानि

जानडीवीमहोदयानुसारं शिक्षा त्रिमुखी प्रक्रियास्ति । अस्याः त्रीणि अङ्गानि भवन्ति -

१. शिक्षकः २. बालकः ३. पाठयक्रमश्च ।

शिक्षकः - प्राचीनकाले शिक्षायां शिक्षकस्य स्थानं मुख्यमासीत् किन्त्वधुना एतादृशी स्थितिर्नास्ति | बालकस्य सर्वाङ्गीणविकासे शिक्षकस्यापि भूमिका प्रमुखा भवति । बालकस्य चरित्रनिर्माणोद्देश्येऽपि शिक्षकस्य विशेषमहत्त्वं भवति । अतः शिक्षकः प्रसन्नचित्तः चरित्रवान् धैर्यशीलश्च स्यात् । शिक्षकः राष्ट्रस्य महत्वपूर्णाङ्गः निर्माताऽपि अस्ति।

२. बालकः - आधुनिकी शिक्षा बालकेन्द्रिताऽस्ति शिक्षायाः सर्वाण्यपि कार्याणि बालकस्य रुचियोग्यताक्षमता-आवश्यकता इत्यादीनामनुसारीणि भवितव्यानि ।

३. पाठ्यक्रमः- शिक्षाप्रक्रियायां पाठ्यक्रमस्य स्थानं महत्वपूर्णमस्ति । अयं पाठयक्रमः बालकशिक्षकयोः मध्ये सेतुवत् कार्यं करोति। पाठयक्रमः समस्तानुभवानां स योगः यं बालकः विद्यालयप्रांगणे प्राप्नोति । पाठयक्रमस्य निर्माणं देशकालसमाजा-नामावश्यकतानुसारं विचारधारानुसारञ्च भवति ।

शिक्षायाः सामान्यकार्याणि

१. जन्मजातशक्तीनां प्रगतिशीलविकासः

मनोवैज्ञानिकदृष्ट्या प्रत्येकस्मिन् बालके प्रेम, जिज्ञासा, कल्पना, तर्कः आत्मसम्मानमित्यादयः जन्मजातशक्तयः भवन्ति। एतासां सर्वासामपि शक्तीनां विकासनं शिक्षायाः प्रमुखं कार्यमस्ति ।

२. व्यक्तित्वस्य सर्वाङ्गीणविकासः

शिक्षायाः द्वितीयं कार्य व्यक्तित्वस्य सर्वाङ्गीणविकासकरणमस्ति । येन बालके समग्रस्यापि ब्रह्माण्डस्य ज्ञानं भवेत्। यथा योग्यनागरिकरूपेण स सत्यं शिवं सुन्दरम् इत्यस्यानुभवं कृत्वा आत्मसाक्षात्कारं कुर्यात् ।

३. मूलप्रवृतिषु नियन्त्रणं, मार्गान्तरणम्, शोधनञ्च -

मैक्डूगलमहोदयानुसारं प्रत्येकं प्राणी शिशुरूपेण काभिश्चित् मूलप्रवृत्तिभिः जन्म गृह्णाति । तस्य सर्वाण्यऽपि कार्याणि मूलप्रवृत्यधीनान्येव भवन्ति । एताभिः मानसिकशक्तिभिः तस्य मूलप्रवृत्तिषु नियन्त्रणं, मार्गान्तरणं, शोधनञ्च कृत्वा आवश्यकतानुसारं व्यवहारे परिवर्तनं कर्तुं शक्यते येन सः दानवात् मानवः सामाजिको वा भूयात् ।

४. चरित्रनिर्माणं नैतिकविकासश्च

शिक्षायाः अत्यन्तमहत्त्वपूर्णं कार्यं बालकचरित्रस्य निर्माणं नैतिकविकासश्चास्ति । यदि मूलप्रवृत्तिषु नियन्त्रणं कृत्वा उचितदिशायां परिवर्तनं क्रियते चेत् बालकस्य व्यवहारः तस्मै समाजाय च प्रशंसनीयः चरित्रनिर्माणे सहायकञ्च जायते। हरबर्टमहोदयानुसारं "शिक्षायाः सम्पूर्णमपि कार्यम् एकैनैव शब्देन अभिव्यक्तुं शक्यते, स च शब्दः 'नैतिकता' इत्यस्ति ।

५. सामाजिकभावनायाः विकासः -

व्यक्तेः समाजेन सह प्रगाढसम्बन्धः परमावश्यकः, समाजं विना तस्य न किमप्यस्तित्वमस्ति । एतदृष्ट्या व्यक्तौ सामाजिक-भावनायाः विकासः तथा चेदं कार्यं शिक्षया एव सम्पाद्यते । अतः सामाजिकभावनाविकासाय शिक्षा आवश्यकी।

शैक्षिकोद्देश्यस्यार्थः- उद्देश्यम् एकं पूर्वदर्शितलक्ष्यमस्ति यद् कामपि क्रियां सञ्चालयति व्यवहारं वा प्रेरयति । यदि लक्ष्यं निश्चितं स्पष्टं च भवति तदा व्यक्तेः क्रिया तावत् कालं यावत् सोत्साहं प्रचलति यावत् सः तं

लक्ष्यं न प्राप्नुयात् । निष्कर्षतः उद्देश्यं तद् पूर्वदर्शितलक्ष्यमस्ति यत्प्राप्तये व्यक्तिः प्रसन्नतापूर्वकं सोत्साहञ्च चिन्तनमग्नः क्रियाशीलश्च भवति ।

शैक्षिकोद्देश्यस्य महत्त्वम्- मानवजीवनस्य प्रत्येकस्य पक्षस्य तथा दैनिकजीवनस्य प्रत्येकस्यां क्रियायां सफलतायै उद्देश्यानां विशेषो महत्त्वम् अस्ति । उद्देश्यं विना न वयं जीवनस्य कस्मिन्नपि क्षेत्रे सफलाः भवितुमर्हामः। शिक्षायामपि तादृशी एव स्थितिरस्ति । अतः बालकस्य सर्वाङ्गीणविकासरूपिणो लक्ष्यस्य प्राप्तये शैक्षिकोद्देश्यानां महत्वानुगुणं तेषां निर्माणमावश्यकं वर्तते ।

शैक्षिकोद्देश्यास्याऽऽवश्यकता- यावत् व्यक्तौ उद्देश्यस्य स्पष्टं ज्ञानं न भवति तावत् तस्य मनसि दृढता आत्मजागृतिश्च नागच्छति । यस्याः शिक्षायाः किमपि उद्देश्यं न भवति सा शिक्षा व्यर्था एव भवति । अतः शिक्षणात् पूर्वं बालके शिक्षके च शैक्षिकोद्देश्यानां ज्ञानं, तस्य स्पष्टता च आवश्यकी अस्ति। उद्देश्यं विना वा उद्देश्यस्य ज्ञानं विना शिक्षकः तादृशः नाविकः यस्मिन् लक्ष्यज्ञानं न भवति तथा तस्य विद्यार्थिनः तस्यां नौकायाम् लक्ष्यहीनाः समुद्रतरङ्गेषु कुत्रचिदपि गच्छन्ति ।

शैक्षिकोद्देश्यानां वर्गीकरणम्- शैक्षिकोद्देश्यानां विभिन्नानि स्वरूपाणि भवन्ति | प्रामुख्येनाऽत्र चत्वारि उद्देश्यानि निर्दिष्टानि-

१. विशिष्टानि २. सार्वभौमिकानि ३. वैयक्तिकानि ४. सामाजिकानि च ।

१. विशिष्टोद्देश्यानि- विशिष्टोद्देश्यानि "असामान्योद्देश्यानि इत्येनाऽपि नाम्ना व्यवह्रियन्ते । एतेषामुद्देश्यानां क्षेत्र सीमितं भवति। एतेषां निर्माणमपि कस्याञ्चित् विशिष्टायां परिस्थित्यां भवति । एतद्दृष्ट्या एतान्युद्देश्यानि नम्राणि, परिवर्तनशीलानि, अनुकूलनयोग्यानि च भवन्ति । शिक्षायाः विशिष्टोद्देश्यानि देशकाल- परिस्थितीनामनुसारं परिवर्तितानि भवन्ति ।

२. सार्वभौमिकोद्देश्यानि- सार्वभौमिकोद्देश्यानि 'सामान्योद्देश्यानि इत्यनेनाऽपि नाम्ना प्रयुज्यन्ते । एतेषामुद्देश्यानां तात्पर्यं व्यक्तौ वांछनीयगुणानां विकासकरणमस्ति । अत एतेषां क्षेत्रं विशिष्टोद्देश्यवत् सीमितं न भवति अपितु एतेषां क्षेत्रं सम्पूर्णापि मानवजातिरस्ति। मानवस्य व्यक्तित्वसंगठनं, शारीरिक-मानसिक-विकासः समाजप्रगतिः, प्रेम, अहिंसा- इत्यादयः शिक्षायाः सार्वभौमिकोद्देश्येषु अन्तर्भवन्ति ।

३. वैयक्तिकोद्देश्यानि- व्यक्तिवादीनामनुसारं समाजापेक्षया व्यक्तिः महत्वपूर्णास्ति । अतः शिक्षायाः वैयक्तिकमुद्देश्यं व्यक्तेः व्यक्तिगतशक्तीनां पूर्णविकासे बलं ददाति । प्रसिद्धशिक्षाशास्त्रिणा टी. पी. ननमहोदयेनोक्तं यत् "शिक्षा बालकस्य वैयक्तिकतायाः पूर्णविकासोस्ति यया सः स्वपूर्णयोग्यतानुसारं मानवजीवने स्वमौलिकयोगदानं दातुं समर्थो भवेत् ।"

© **Associated Asia Research Foundation (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

४. सामाजिकोद्देश्यानि- समाजवादीनां मतानुसारं समाजः व्यक्त्यपेक्षया श्रेष्ठः भवति । अतः ते शिक्षायाः सामाजिकोद्देश्येषु बलं ददति । ते विश्वसन्ति यत् व्यक्तिः सामाजिकप्राणी वर्तते । सा समाजं विना विकासं कर्तुं नार्हति। अतः व्यक्त्या स्ववैयक्तिकतायाः विकासः समाजावश्यकतानुरूपं समाजादर्शानुरूपमेव करणीयम् ।

शैक्षिकोद्देश्यानां निर्माणाधारः - शैक्षिकोद्देश्यानां सम्बन्धं सम्पूर्णसमाजस्य सर्वैः बालकैस्सहास्ति । अत एतेषां निर्माणकार्य-मुत्तरदायित्यवपूर्णमस्ति । शैक्षिकोद्देश्यानां सम्बन्धः जीवनोद्देश्यर्भवति, अतः शैक्षिकोद्देश्यानां निर्माणमपि तथैवास्ति यथा जीवनोद्देश्यानां निर्माणमस्ति । शिक्षायाः चत्वारः मुख्याधाराः । ते च -

१. आदर्शवाद्याधारः २. प्रकृतिवाद्याधारः ३. प्रयोजनवाद्याधारः ४. यथार्थवाद्याधारश्च ।

आदर्शवाद्याधारः प्रकृतिवाद्याधारश्च

आदर्शवादीनामुनसारं शिक्षा एका आध्यात्मिका प्रक्रियास्ति या व्यक्तिमाध्यात्मिक-जगते रचयति तथा प्रकृतिवादीनां मतमस्ति यत् शिक्षा एका भौतिकी प्रक्रियास्ति या व्यक्ति केवलं सांसारिकोपभोगाय रचयति । अत आदर्शवादे भौतिकजगत अपेक्षया सार्वभौमिकमूल्यानां प्राप्तये बलं भवति किन्तु प्रकृतिवादे प्रकृतिरेव प्रधाना भवति । यः समाज आदर्शवादी भवति, तत्रत्या शिक्षा तदुद्देश्यानि च निश्चितानि सनातनानि, अपरिवर्तनशीलानि च भवन्ति । किन्तु प्रकृतिवादे एतादृशी स्थितिर्नास्ति ।

यथार्थवाद्याधारः प्रयोजनवाद्याधारश्च

प्रयोजनवादस्य विचारधाराः आदर्शवाद्याधारेभ्यः सर्वथा भिन्नाः सन्ति | प्रयोजनवादस्य विचारधारानुसारं सत्यं सदैव परिवर्तितं भवत्येव, यथार्थवादिनः अपि प्रयोजनवादीनामनुरूपं समाजस्य भौतिकपरिस्थित्याधारेण शिक्षायाः नम्राणि, अनुकूलनयोग्यानि परिवर्तनशीलानि च विशिष्टोद्देश्यानि निर्मान्ति । एतेषामनुसारं शैक्षिकोद्देश्यानामाधारः जीवनदर्शनम्, राजनीतिकप्रगतिः, प्रौद्योगिकोन्नतिः, सामाजिकार्थिक दशाश्च भवन्ति ।

शिक्षायाः वैयक्तिकोद्देश्यानि-

वैयक्तिकोद्देश्यस्यार्थः - शिक्षायाः वैयक्तिकोद्देश्यं प्राचीनमुद्देश्यमस्ति । एतदुद्देश्यस्य समर्थकाः समाजापेक्षया व्यक्तिं श्रेष्ठं मन्यन्ते । तेषां कल्पनास्ति यत् व्यक्तिं विना समाजस्य कल्पना, कल्पना एवास्ति, व्यक्तिभिरेव स्वहितरक्षायैद समाजस्य रचना कृता तथा यथासमयं संस्कृति-सभ्यता- विज्ञानादिक्षेत्रेषु स्वयोगदानानि दत्तानि। व्यक्तेः विकासादेव समाजस्य विकासः समभवत्। अतः शिक्षया व्यक्तिगतरूचिक्षमताविशेषतानां

© Associated Asia Research Foundation (AARF)

विकासः करणीयः । वर्तमानेऽस्मिन् युगे यदाप्रभृति मनोविज्ञानं शिक्षाक्षेत्रे स्थानमलभत् तदाप्रभृति रूसो, पेस्तालॉजी, फ्रोबिल तथा नन-आदिभिः शिक्षाशास्त्रिभिः शिक्षायाः वैयक्तिकोद्देश्येषु बलं दत्तम् ।

वैयक्तिकोद्देश्यस्य संकुचितार्थः- शिक्षायाः वैयक्तिकोद्देश्यम् आत्माभिव्यक्तिः बालकस्य सर्वांगीणविकासः तथा प्राकृतिकविकास इत्यादिनामभिः अवबोध्यन्ते । एतस्मिन्नर्थे उद्देश्यमिदं प्रकृतिवादिदर्शनाधारितमस्ति । रूसो-महोदयेनोक्तं यत् प्रत्येकं व्यक्तिः एकं विशिष्टं स्वभावं धारयित्वा जन्म गृह्णाति । वयं चिन्तनं विनैव भिन्नरुचियुतान् बालकान् एकस्मिन्नेव कार्ये संयोजयामः |वस्तुतः एतादृशी शिक्षा तेषां विशेषताः नाशयति तथा ताः विशेषताः निर्जीवाः करोति ।

वैयक्तिकोद्देश्यस्य सन्दर्भे टी.पी. नन-महोदयेनोक्तं यत् मानवजगति यदि काचिदपि श्रेष्ठता आगन्तुं शक्नोति तर्हि सा व्यक्तिगतपुरुषाणां नारीणां च स्वतन्त्रप्रयासैरेव आगमिष्यति । अतः शिक्षायाः संगठनमेतद् सत्याधारितमेव भवेत् । अन्यत्रापि टी. पी. ननमहोदयेनोक्तं यत् शिक्षया प्रत्येकस्यै व्यक्तये एतादृश्यः अवस्थाः प्राप्तव्याः यास्ववस्थासु तस्याः वैयक्तिकतायाः पूर्णः विकासः स्यात् ।

वैयक्तिकोद्देश्यस्य व्यापकार्थः- व्यापकार्थे शिक्षायाः वैयक्तिकोद्देश्यमस्माकं समक्षमात्मानुभूतिरूपेण आगच्छति । मनोविज्ञान-मपि व्यक्तित्वविकासस्य व्यापकार्थस्य समर्थनं करोति । बुद्धेस्तथा योग्यतायाः भेदान् दृष्ट्वापि प्रत्येकस्मै बालकाय समानः कठोरश्च पाठ्यक्रमः, तेन पाठ्यक्रमेण च शिक्षाप्रदानममनोवैज्ञानिकमस्ति । अतः प्रत्येकस्य विद्यालयस्य कर्तव्यमस्ति यत् बालकस्य रुचीणामावश्यकतानां योग्यतानाञ्चानुरूपमेव शिक्षायाः व्यवस्थां कुर्यात् । सन्दर्भेऽस्मिन् नन-महोदयस्य विचारः शिक्षा बालकस्य तादृशी सहायतां कुर्यात् यया सः समाजाय मानवीयजीवनाय वा योग्यतानुसारं स्वमौलिकं योगदानं दद्यात् । अस्यैव महोदयस्यानुसारं -"शिक्षायाः वैयक्तिकोद्देश्यं व्यक्तेः उत्तरदायित्वकार्याणि न्यूनीकरोति मित्राणि प्रति यतः व्यक्तेः विकासः समाजे एव भवितुमर्हति।"

निष्कर्षतः व्यापकार्थे शिक्षायाः वैयक्तिकोद्देश्यादाशयोस्ति यत् आत्मानुभूतिरेव प्राधान्यं भजते । आत्मानुभूत्या आत्मनः ज्ञानं केवलं समाजमाध्यमेनैव भवितुर्हति । अतः व्यक्तेः कर्तव्यमस्ति यत् सः समाजहितचिन्तकः स्यात्, समाजाय च यथाशक्तिं स्वयोगदानं दद्यात् । व्यापकार्थे व्यक्तिविकासस्यार्थोस्ति यद् अस्माकं व्यक्तित्वस्य विकासः अस्मत्कर्मानुकूल एव भवति । शिक्षया व्यक्तित्वस्य विकासं कृत्वा मानवेन आत्मसाक्षात्कारः कर्तव्यः ।

शिक्षायाः सामाजिकोद्देश्यम्

सामाजिकोद्देश्यार्थः - शिक्षायाः सामाजिकोद्देश्यस्य जन्म, शिक्षायाः वैयक्तिकोद्देश्यस्य प्रतिक्रियारूपेण समभवत् । एतदुद्देश्य-समर्थकाः वदन्ति यत् व्यक्तिः स्वभावेन सामाजिक-प्राणी अस्ति। यदि समाजेन तस्याः पृथक्करणं स्यात् तदा तस्याः जीवनं कठिनमस्ति । प्रत्येकस्य बालकस्य जन्म समाजे एव भवति । तस्य

पालनपोषणादिकमपि समाजे एव भवति | किं बहुना तस्य सर्वांगीणविकासोऽपि समाजे एव भवति । अतः बालकः समाजस्य ऋणी | तात्पर्यतः शैक्षिकोद्देश्यानां निर्माणं समाजस्य तत्कालीनावश्यकतानुरूपमेव भवेत् । अतः प्रसिद्धशिक्षाशास्त्रिणा माट-महोदयेन कथितम्- "ये विद्वांसः व्यक्तिं समाजात् श्रेष्ठतरं मन्यन्ते, ते स्मरेयुः यत् निस्समाजं व्यक्तेः कल्पना कल्पनैवास्ति ।" शिक्षायाः सामाजिकोद्देश्यैरेव समाजवादस्य जन्म समभवत् ।

सामाजिकोद्देश्यस्य संकुचितार्थः- समाजवादस्य उग्ररूपे सामाजिकोद्देश्यस्य संकुचितार्थे बलं दत्तमस्ति अनुयायिभिः । व्यक्तेः अपेक्षया समाजः बृहदस्ति। एतस्मात् व्यक्तेः सम्पूर्णमपि जीवनं राष्ट्रोन्नतये राष्ट्रविकासाय वर्तते। अतः राष्ट्रस्याधिकारमस्ति यत् सः स्वेच्छानाम्, आदर्शानाम्, आवश्यकतानाञ्च पूर्तये शिक्षया व्यक्तेः बालकस्य वा निर्माणं कुर्यात्। शिक्षायाः सामाजिको-द्देश्यान्तर्गतसंकुचितार्थे राष्ट्रमेव सर्वोत्तमस्ति । एतदनुसारं मानवस्वतन्त्रतायाः दमनं कृत्वा मानवीयजीवनस्य प्रत्येकाङ्गस्य पूर्णरूपेण समाजीकरणं भवति । संक्षेपतः शिक्षायाः सामाजिकोद्देश्यान्तर्गतसंकुचितार्थे मानवीयजीवनस्य समाजीकरणमस्ति ।

सामाजिकोद्देश्यस्य व्यापकार्थः- समाजवादस्य उदाररूपे जनतन्त्रवादे सामाजिकोद्देश्यस्य व्यापकार्थे बलं दत्तमस्ति । बालकेभ्यः तादृशी शिक्षा दातव्या यया ते स्वतन्त्रनागरिकरूपेण राष्ट्ररूपेण राष्ट्रसेवां कुर्युः । भारतवर्षं जनतन्त्रात्मकं राष्ट्रमस्ति अतः अस्मदीयायाः शिक्षायाः उद्देश्यं सच्चरित्रयुक्तानां कर्मवीराणां च नागरिकाणामुत्पत्तिकरणमस्ति । बागलेमहोदयस्य मतमस्ति सामाजिककुशलतायाः मापदण्डः सोऽस्ति येन शिक्षासम्बन्धिप्रत्येकस्य कार्यस्य मूल्यांकनं भूयात् । अतस्तेन स्वपुस्तके "एज्यूकेशनल वैल्यूज" मध्ये सामाजिकदृष्ट्या कुशलव्यक्तीनां निम्नलिखिताः तिस्रः विशेषताः लिखिताः।

१ आर्थिक-कुशलता २ निषेधात्मक-नैतिकता ३ विधायक-कुशलता

सामाजिककुशलतायाः सन्दर्भे स्पष्टतया जॉन डीवीमहोदयेनोक्तं- सर्वव्यापकरूपेण सामाजिकुशलता व्यक्तौ समाजहित-भावनायाः संचारकरणस्य तथा स्वस्य परेषां च हितान् पृथग्रक्षणभावनां नष्टकरणस्य प्रवृत्तिरस्ति ।

संसारे प्रत्येका व्यक्तिः वंशानुक्रमात् केवलं पाशविकप्रवृत्तीः धारयित्वा जन्म गृह्णाति । सामाजिकवातावरणस्यैव प्रभावः यत् जातकः दानवात् मानवरूपे समायाति । अतः शिक्षायां समाजहिते बलं दीयते | समाजे एव संस्कृतेः सभ्यतायाश्च जन्म पोषणं च भवति । अतः सामाजिकहितानां रक्षा व्यक्तेः परमं कर्तव्यमस्ति ।

शिक्षायाः विभिन्नोद्देश्यानि

© **Associated Asia Research Foundation (AARF)**

१ ज्ञानार्जनस्योद्देश्यम्-

शिक्षायां ज्ञानार्जनस्योद्देश्यप्रतिपादनम् आदर्शवादिसम्प्रदायेन कृतमस्ति । एतदुद्देश्यानुसारं ज्ञानबलेनैव व्यक्तेः विकासः भवति । जीवने च सः सुखस्य शान्तेश्चानुभवं करोति ।

संकुचितार्थे - संकुचितार्थं एतस्योद्देश्यं "विद्यायै विद्या" इत्यनेन ज्ञायते । प्रचीनकालादेव विद्वद्भिः एतदुद्देश्ये बलं दत्तम्। साधारणोऽपि जनः इममेवोद्देश्यमाधृत्य शिक्षां प्राप्नोति, स्वबालकाय च शिक्षां दापयति या च शिक्षा पुस्तकीया एव भवति ।

व्यापकार्थे - व्यापकार्थे ज्ञानस्याभिप्रायः मानसिकविकासेन सह वर्तते। अतः ज्ञानस्य तात्पर्यं विभिन्नविषयाणां रटनं नास्ति अपितु मष्तिष्के शक्तिप्रदानं कृत्वा अनुशासनीयमस्ति । एतादृशं ज्ञानम् उचितानुचितान् बोधयति तथा कार्यकरणक्षमतां विकासयति ।

२ सांस्कृतिक-विकासस्योद्देश्यानि-

आचारविचाराधारेष्वेव संस्कृतेस्थापना भवति । संकुचितार्थे संस्कृतेः तात्पर्यमस्ति परिवेशस्य वार्तालापस्य कश्चन विशिष्टः आचारः | एतेषां ज्ञानं प्राप्य मानवः आदरणीयो भवति । एतद्विपरीतं व्यापकार्थे संस्कृतेः तात्पर्यमस्ति सर्वोच्च-विचाराणां ज्ञानं प्राप्य तस्य ज्ञानस्य दैनिकजीवने प्रयोगः । विदुषां मतमस्ति यत् संस्कृतिः बालकस्य दानवीय-प्रवृत्तीनां शुद्धिकरणं कृत्वा तस्य आत्मानं प्रभावयति। एतेन तस्य चरित्रं महद्प्रशंसनीयञ्च भवति । संस्कृतेः विभिन्नानि रूपाणि भवन्ति । यथा १. व्यक्तिगत-संस्कृतिः २. जातीय-संस्कृतिः. ३. राष्ट्र-संस्कृति, ४. विश्व-संस्कृतिश्च ।

काऽपि संस्कृतिः तदा एव सुयोग्या, यदा सा अन्येभ्यः उपयोगिनी स्यात् । यदि तया व्यक्तिः लाभं प्राप्नोति तथा समाजस्य कल्याणं भवति, तदेव उत्तमा संस्कृतिः । संस्कृतेः विशिष्टः गुणः भवति यत् सा प्रगतिशीला भवति । तात्पर्यतः संस्कृतिः सदैव प्रगतिशीला भवति तथा चानेनैव तस्याः विकासोऽपि भवति । अतः शिक्षायाः उद्देश्यनिर्माणे संस्कृतेर्विकासस्य अपि ध्यानं दातव्यम्। संस्कृतेः केचन प्रमुखाः गुणास्सन्ति - १ संस्कृत्या मनुष्यस्य सर्वांगीणविकासः भवति २ ज्ञानं केवलं मस्तिष्काय शक्तिं सूचनां च ददाति किन्तु संस्कृतिः मस्तिष्केन सहेव हृदयमपि शिक्षयति । ३ संस्कृतेः ज्ञानं प्राप्य सामाजिक-वातावरणेन सह समायोजनस्थापने सारल्यं भवति । मानवाय सांस्कृतिकोद्देश्येषु बलं दत्तवता महात्मना गान्धिनोक्तं "संस्कृतिः मानवजीवनस्य आधारः तथा प्रारम्भिकं वस्तु अस्ति । अतः भवतां व्यक्तिगत-व्यवहारस्य सूक्ष्मायाः सूक्ष्माष्वपि वार्तासु एषा प्रकटिता स्यात्।"

३ चरित्र-विकासस्योद्देश्यम्-

शिक्षायाः प्रमुखमुद्देश्यं बालकस्य चारित्रिकविकासः अस्ति । चरित्रस्य अर्थः भवति- "आन्तरिकदृढता एकता च । चरित्रवान् व्यक्तिः स्वजीवने यं कमपि कार्यं करोति तत् तस्य आदर्शसिद्धान्ताद्यनुसारमेव भवति । चरित्रनिर्माणविषये हरबर्ट-महोदयेनोक्तं "शिक्षणस्य महदन्तिमञ्चोद्देश्यं सद्गुणविकासस्य धारणायां निहितमस्ति, परन्तु शिक्षणेनान्तिमोद्देश्यप्राप्तेः पूर्वमेव बालकेषु बहुमुखीरुचीनां विकासे बलं दातव्यम् ।" तात्पर्यतः शिक्षया बालकस्य विचाराणि पवित्राणि शुद्धानि च भवन्ति, यया सः समाजोपयोगी शुद्धाचरणकर्ता च भवति । चरित्रविकासस्य केचन प्रमुखाः गुणाः सन्ति । यथा- सच्चरित्रयुक्तं मानवं सर्वे प्रशंसन्ति, सच्चरित्रयुक्तजनः स्वचरित्रबलेन जीवनस्य प्रत्येकस्मिन् क्षेत्रे केवलां सफलतामेव न प्राप्नोति, अपितु स्वलक्ष्यमपि आवर्जयति । एतस्मिन् विषये स्पेन्सरमहोदयेनोक्तं यत् मानवस्य सर्वोत्तमावश्यकता तथा सर्वोत्तमरक्षकः चरित्रमस्ति न तु शिक्षा जॉनडीवीमहोदयेनोक्तम्- विद्यालयीयायाः शिक्षायाः अनुशासनस्य च सर्वभूतमुद्देश्यमस्ति चरित्रनिर्माणम् ।

४. जीविकोपार्जनस्योद्देश्यं व्यावसायिकोद्देश्यं वा -

केषांचन विदुषां मतमस्ति यत् शिक्षा केवलं ज्ञानेन संस्कृत्या चालंकृता न स्यात्, अपितु शिक्षायाः उद्देश्यं व्यावसायिकमपि स्यात् । वर्तमानेस्मिन् युगे मानवसमक्षं जीविकासमस्या प्रमुखा विद्यते। अतः आधुनिकशिक्षायाः उद्देश्यं व्यावसायिकोद्देश्यमस्ति । सा शिक्षा निरर्थका यां प्राप्य मानवः स्वप्राथमिकावश्यकतानामपि पूर्तिं न कर्तुं शक्नुयात् । मानवस्यार्थिकोन्नतिः एव अन्योन्नतीनाम् आश्रया भवति । अतः जीविकोपार्जनस्योद्देश्यं महत्वपूर्णं स्थानं भजते । व्यावसायिकोद्देश्यैरेव व्यक्तेः राष्ट्रस्य चोन्नतिः भवति । यस्मिन् राष्ट्रे व्यावसायिकोद्देश्येषु बलं दीयते तत्रैव व्यावसायिकी औद्योगिकी चोन्नतिः भवति ।

५. समविकासस्योद्देश्यम्-

समविकासोद्देश्यस्य तात्पर्यमिदं यत् प्रत्येकस्यापि बालकस्य शारीरिक- मानसिक-भावात्मक-कलात्मक-ज्ञानात्मक-नैतिकादयः विकासाः शक्त्या सह समानरूपेण भवेयुः । समेषां शक्तीनां सहैव विकासः स्यात् । उद्देश्यमिदं मनोवैज्ञानिकतथ्याधारितमस्ति । शिक्षामनोविज्ञानाध्ययनेन ज्ञायते यत् प्रत्येकं बालकः काश्चन जन्मजातशक्तिभिः सह समुत्पन्नो भवति । तस्य व्यक्तित्वस्य सन्तुलित-विकासः अपेक्षितश्चेत् शक्तीनां समानरूपेण विकासः स्यादेव । यदि शिक्षया बालकस्य समस्तशक्तीनां समानरूपेण विकासः न भवति, तदा प्रवृत्तीनामाधिक्याद् न्यूनत्वाद् वा व्यक्तित्वस्य संतुलनं नष्टं भवति । समविकासस्य महत्त्वं प्रतिपादयता रूसो महोदयेनोक्तम्-"अस्मदङ्गानां शक्तीनाश्च स्वाभाविकविकासः प्रकृतेः शिक्षारचनां करोति । पेस्टॉलाजी महोदयेनोक्तं "शिक्षा मानवस्य जन्मजातशक्तीनां स्वाभाविकः, सामन्जस्यपूर्णः, प्रगतिशीलश्च विकासोऽस्ति ।

६. नागरिकतायाः उद्देश्यम् -

जनतन्त्रे बालकः कर्मवीरः, परोपकारी, सच्चरित्रवान्, सभ्यनागरिकश्च स्यात्  तथा च नागरिकतायाः कृतेः बौद्धिकनैतिक- सामाजिक-गुणानामावश्यकता भवति । अत एतदुद्देश्यानुसारं शिक्षायाः व्यवस्था तादृशी स्यात् यया प्रत्येकस्मिन् बालके एते सर्वेऽपि गुणाः तेषां रूचि-योग्यता- क्षमतानुसारं विकसितास्स्युः । नागरिकतायाः उद्देश्यानुसारं बालकस्य शिक्षा तादृशी स्यात् यां प्राप्य सः स्वतंत्ररूपेण व्यक्तित्वस्य विकासकरणे समर्थः स्यात् तथा स्वतन्त्रनागरिकरूपेण राष्ट्रस्य सेवां कुर्यात्। जनतन्त्रं जीवनयापनस्यैका कलास्ति । अतः व्यक्तिः कलामिमां जानीयात् । प्रत्येकस्मै नागरिकाय राजनीतिक-सामाजिकप्रक्रियाणां ज्ञानमावश्यकम्, अतः नागरिकतायाः शिक्षा परमावश्यकी ।

७. पूर्णजीवनस्योद्देश्यम्-

हरबर्टस्पेन्सर-महोदयेन एतस्मिनुद्देश्ये बलं दत्तमस्ति । तेनोक्तं -"शिक्षा तादृशी स्यात् या अस्मान् ज्ञापयेत् यद् मानवेन शरीरं प्रति कथं वर्तितव्यम्? मनः प्रति कथं व्यवहर्तव्यम्? योजनायाः प्रबन्धनं कथं स्यात् ? परिवारस्य पालनं पोषणं कथं स्यात् ? एकेन सभ्यनागरिकेण कथं व्यवहर्तव्यम् ? प्रकृतिप्रदत्तानां सुखानां कथं प्रयोगः करणीयः ? तथा च कथं समस्तशक्तीनां प्रयोगः स्वस्य परेषाञ्च हिताय भवेत् ? "शिक्षया मानवजीवनस्य विभिन्नांशानां विकासः तथा स्यात् येन सः भाविनो जीवनस्य समस्तसमस्याः समादधेत् ।

८. शारीरिक-विकासस्योद्देश्यम्-

शारीरिक-विकासस्योद्देश्येन तात्पर्यमिदमस्ति यद् बालकाय शिक्षा तादृशी स्यात्, यां प्राप्य सः शारीरिकरूपेण स्वस्थः, सुदृढः, सुन्दरः, बलवान् च स्यात् । रूसो-प्लेटो-प्रभृतयः सर्वेऽपि विद्वांसः शरीरिकशिक्षायै बलं दत्तवन्तः । शारीरिकविकासात् मानवः स्फूर्तिमान् क्रियाशीलश्च भवति । अत एव प्रत्येकेन मानवेन स्वस्थेन भाव्यम्। यदि मानवः स्वस्थः न स्यात् तदा सः जीवनस्य कमपि कार्यं सोत्साहेन विधातुं न शक्नोति | यस्य समाजस्य राष्ट्रस्य वा मानवाः बलवन्तः भवन्ति स समाजः राष्ट्रं वा अत्यन्तं बलशाली भवति । विद्वद्भिरपि उक्तं यत् "स्वस्थे शरीरे एव स्वस्थमस्तिष्कस्य वासः भवति । तथा अस्वस्थशरीरं मानसिकरोगाणां गृहमस्ति। डॉ. जानसन-महोदयेनाप्युक्तं "स्वास्थ्य-संरक्षणं नैतिकं धार्मिकञ्च कर्तव्यमस्ति यतः स्वास्थ्यमेव सर्वेषां सामाजिकगुणानामाधारो वर्तते।" अरस्तुमहोदयेनोक्तम्- "स्वस्थशरीरे स्वस्थमस्तिष्कस्य वासः भवति ।"

९. अनुकूलनस्योद्देश्यम्-

विद्वन्मतानुसारं शिक्षायाः उद्देश्यं बालके एतादृश्याः क्षमतायाः विकासकरणमस्ति, येन स आत्मानं वातावरणानुकूलं परिस्थित्यानुकूलं कुर्यात् । संसारस्य प्रत्येकोऽपि मानवः जीवनाय परिस्थित्या प्राकृतिकेन सामाजिकेन च वातारणेन अनुकूलनं कुर्यात् । मानवेन वातावरणेन सह संघर्षोऽपि क्रियते यस्य संघर्षः

© **Associated Asia Research Foundation (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

सफलो भवति स जीवति। एतद्विपरीतं भवति यस्य संघर्षः असफलो भवति स नश्यति । अतः शिक्षायाः उद्देश्यं वातावरणेन अनुकूलन-स्थापनं वर्तते।

१०. आत्माभिव्यक्तेरुद्देश्यम्-

व्यक्तिवादस्य विचारकैः आत्माभिव्यक्तेः आत्मप्रकाशनस्य च समर्थनं कृतम् । आत्मप्रकाशनस्यार्थः मूलप्रवृत्तीनां स्वतन्त्ररूपेण विकासनमस्ति । अत एतदुद्देश्यानुसारं बालकस्य मूलप्रवृत्तीनां विकासः तथा स्यात् यथा सः ताः प्रवृत्तयः, स्वतन्त्ररूपेण अभिव्यक्तं कुर्यात् । एतद् तदैव सम्भवं, यदा समाजे तादृशी स्वतन्त्रता परिस्थितयश्च सहायिकास्स्युः, येन बालकः स्वकाम-जिज्ञासा- आत्मगौरवम् इत्यादिमूलप्रवृत्तीनां स्वतन्त्ररूपेण प्रकाशनं कुर्यात् । एतस्य तर्के केचन बिन्दवः १. बालकस्य मूलप्रवृत्तयः जन्मगताः भवन्ति, अतः स अधिकारी अस्ति तासां स्वतन्त्रप्रकाशने। २. मनोवैज्ञानिकदृष्ट्या मूलप्रवृत्तीनां विकासः परमावश्यकः । ३. मूलप्रवृत्तीनां दमनकारणात् बालके मानसिकरोगाः उत्पत्स्यन्ते । अत एतासां दमनं हानिकारकमस्ति । ४. मूलप्रवृत्तीनां व्यक्तकरणेन बालकः आनन्दमनुभवति । अतः तस्य मानसिक-स्वस्थतायै एतदावश्यकमस्ति ।

११. आत्मानुभूतेरुद्देश्यम्-

आत्मानुभूतिरथवा आत्मबोधस्यार्थः यत् प्राणी प्रकृतिं, मानवं, परमेश्वरं, आत्मानं वा जानीयात् । अतः विदुषां मतमस्ति यत् शिक्षायाः उद्देश्यं बालकस्य आत्मिक-विकासोऽस्ति, येन सः समाजमाध्यमेन स्वसर्वोच्चगुणानामनुभूतिं कुर्यात्। प्राचीनभारतीय-शिक्षायामात्मानुभूतेरुद्देश्यस्य स्थानं महत्त्वपूर्णमासीत् । तदानीं तादृशः एव विषयाः पाठ्यन्ते स्म ये बालकेभ्य आत्मानुभूतेः मोक्षप्राप्तेः वा ज्ञानं दद्युः । आत्मानुभूत्या मानवः सुखं शान्तिञ्च प्राप्नोति, अत उद्देश्यमिदमुच्चं महच्चास्ति । उद्देश्यमिदं बालकानां पाशविकप्रवृत्तीषु परिवर्तनं करोति । आत्मानुभूतेरुद्देश्येन बालकस्य चारित्रिकविकासः भवति ।

१२ कुशलजीवनयापनकलायाः उद्देश्यम्-

शिक्षाया उद्देश्यमस्ति यत् सा बालकाय समाजोचित-जीवनयापनकलायाः दीक्षां दद्यात् । तया कलया च शिक्षिता कुर्यात्। एकान्ते मानवेन जीवनं यापयितुं न शक्यते, न च तस्य पूर्णो विकासः भवितुमर्हति । अतस्तस्य पूर्णविकासाय समाज आवश्यकः । सामाजिकजीवनाय च तादृशं व्यवहारज्ञानं तादृशी कुशलता कला च अपेक्षितास्ति । अतः शिक्षा तादृशस्य व्यवहारस्य ज्ञानेन मानवं परिपूरयेत्।

।। इति शम् ।।

© **Associated Asia Research Foundation (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.